## लवणाल्लुक् । (२४/१५७४)

'संसृष्टे' (४.४.२२/१५७२) इत्यनेनोत्पन्नस्य ठको लवणशब्दाल् लुक् भवति । [1]लवणः सूपः । लवणं शाकम् । लवणा यवागूः । द्रव्यवाची लवणशब्दो लुकं प्रयोजयति, न गुणवाची ॥

## मुद्गादण् । (२५/१५७५)

मुद्गशब्दाद् अण् प्रत्ययो भवति संसृष्टे [2]इत्येतस्मिन् विषये । ठकोऽपवादः । मौद्ग ओदनः । मौद्गी यवागूः ॥

## व्यञ्जनैरुपसिक्ते । (२६/१५७६)

तेन इत्येव । [3]व्यञ्जनवाचिभ्यः [4]प्रातिपदिकेभ्यः तृतीयासमर्थेभ्यः उपसिक्ते इत्येतस्मि[5]न्नर्थे [6]ठक् प्रत्ययो भवति । [7]दध्ना उपसिक्तं दाधिकम् । सौपिकम्[8] । [9]खारिकम् । व्यञ्जनैः इति किम् ? उदकेनोपसिक्त ओदनः ॥

## ओजःसहोऽम्भसा वर्तते । (२७/१५७७)

ओजस् सहस् अम्भस् इत्येतेभ्यः तृतीयासमर्थेभ्यो वर्तते [10]इत्यर्थे ठक् प्रत्ययो भवति । ओजसा वर्तते औजसिकः [11]शूरः । साहसिक[12]श्चौरः । आम्भसिको मत्स्यः ॥

## तत्प्रत्यनुपूर्वमीपलोमकूलम् । (२८/१५७८)

तद् इति द्वितीयासमर्थविभक्तिः । प्रति अनु [13]इत्येवंपूर्वेभ्यः ईपलोमकूलशब्देभ्यो द्वितीयासमर्थेभ्यो वर्तते इत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति । ननु च वृतिरकर्मकः, तस्य कथं [14]कर्मणा सम्बन्धः ? क्रियाविशेषण-मकर्मकाणामपि कर्म भवति । [15]प्रतीपं वर्तते प्रातीपिकः । आन्वीपिकः । प्रातिलोमिकः । आनुलोमिकः । प्रातिकूलिकः । [16]आनुकूलिकः ॥

## परिमुखं च । (२९/१५७९)

परिमुखशब्दाद् [17]द्वितीयासमर्थाद् वर्तते इत्यस्मिन्नर्थे ठक् प्रत्ययो भवति । परिमुखं वर्तते पारिमुखिकः[18] । चकारोऽनुक्तसमुच्चयार्थः । [19]पारिपार्श्विकः ॥

---

1. लवणेन संसृष्टः इत्यधिकम् ब. क. ड. इ. ह. 2. एतस्मिन् नास्ति फ, अर्थे इ. ह. 3. व्यञ्जनविशेषवाचिभ्यः ड. 4. प्रातिपदिकेभ्यः नास्ति फ. 5. विषये क. इ. 6. यथाविहितं प्रत्ययो भवति ब. 7. दध्ना उपसिक्तः ओदनः दाधिकः ड. 8. कार्मरिकम् इत्यधिकम् ह. 9. खारिकम् नास्ति ब. क. ड. फ, वारिकम् इ. 10. इत्येतस्मिन्नर्थे फ. 11. शूरः नास्ति फ. 12. चौरः नास्ति फ. 13. इति नास्ति फ. 14. कर्मणादिसम्बन्धः ह, कर्मणा सह सम्बन्धः ड. 15. प्रतीपं वर्तते नास्ति फ. 16. नास्ति फ. 17. तदिति इत्यधिकम् ड. 18. सेवकः इत्यधिकम् ब. ड. फ. ह. 19. तेन इत्यधिकम् फ.